# Shri Bhairavi aShTottarashatanAmastotram

# શ્રીભૈરવ્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : bhairavI AshTottarasharanamastotra 1

File name : bhairavyaShTottarashatanAmastotra.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 15, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

# શ્રીભૈરવ્યષ્ટોત્તરશતનામસ્તોત્રમ્

અથવા શ્રીત્રિપુરભૈરવી અષ્ટોત્તરશતનામસ્તોત્રમ્ ।

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ અથ ભૈરવ્યષ્ટોત્તરશતનામસ્તોત્રપ્રારંભઃ ॥

શ્રીદેવ્યુવાચ ।

કૈલાસવાસિન્ભગવન્પ્રાણેશ્વર કૃપાનિધે ।
ભક્તવત્સલ ભૈરવ્યા નામ્નામષ્ટોત્તરં શતમ્ ॥ ૧॥

ન શ્રુતં દેવદેવેશ વદ માં દીનવત્સલ ।

શ્રીશિવ ઉવાચ ।

શ ૃણુ પ્રિયે મહાગોપ્યં નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨॥

ભૈરવ્યાઃ શુભદં સેવ્યં સર્વસમ્પત્પ્રદાયકમ્ ।
યસ્યાનુષ્ઠાનમાત્રેણ કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૩॥

ૐ ભૈરવી ભૈરવારાધ્યા ભૂતિદા ભૂતભાવના ।
કાર્ય્યા બ્રાહ્મી કામધેનુઃ સર્વસમ્પત્પ્રદાયિની ॥ ૪॥

ત્રૈલોક્યવન્દિતા દેવી મહિષાસુરમર્દિની ।
મોહઘ્ની માલતીમાલા મહાપાતકનાશિની ॥ ૫॥

ક્રોધિની ક્રોધનિલયા ક્રોધરક્તેક્ષણા કુહૂઃ ।
ત્રિપુરા ત્રિપુરાધારા ત્રિનેત્રા ભીમભૈરવી ॥ ૬॥

દેવકી દેવમાતા ચ દેવદુષ્ટવિનાશિની ।
દામોદરપ્રિયા દીર્ઘા દુર્ગા દુર્ગતિનાશિની ॥ ૭॥

લમ્બોદરી લમ્બકર્ણા પ્રલમ્બિતપયોધરા ।

પ્રત્યઙ્ગિરા પ્રતિપદા પ્રણતક્લેશનાશિની ॥ ૮॥

પ્રભાવતી ગુણવતી ગણમાતા ગુહેશ્વરી ।
ક્ષીરાબ્ધિતનયા ક્ષેમ્યા જગત્ત્રાણવિધાયિની ॥ ૯॥

મહામારી મહામોહા મહાક્રોધા મહાનદી ।
મહાપાતકસંહર્ત્રી મહામોહપ્રદાયિની ॥ ૧૦॥

વિકરાલા મહાકાલા કાલરૂપા કલાવતી ।
કપાલખટ્વાઙ્ગધરા ખડ્ગખર્પ્પરધારિણી ॥ ૧૧॥

કુમારી કુઙ્કુમપ્રીતા કુઙ્કુમારુણરઞ્જિતા ।
કૌમોદકી કુમુદિની કીર્ત્ત્યા કીર્ત્તિપ્રદાયિની ॥ ૧૨॥

નવીના નીરદા નિત્યા નન્દિકેશ્વરપાલિની ।
ઘર્ઘરા ઘર્ઘરારાવા ઘોરા ઘોરસ્વરૂપિણી ॥ ૧૩॥

કલિઘ્ની કલિધર્મઘ્ની કલિકૌતુકનાશિની ।
કિશોરી કેશવપ્રીતા ક્લેશસઙ્ઘનિવારિણી ॥ ૧૪॥

મહોત્તમા મહામત્તા મહાવિદ્યા મહીમયી ।
મહાયજ્ઞા મહાવાણી મહામન્દરધારિણી ॥ ૧૫॥

મોક્ષદા મોહદા મોહા ભુક્તિમુક્તિપ્રદાયિની ।
અટ્ટાટ્ટહાસનિરતા કઙ્કણન્નૂપુરધારિણી ॥ ૧૬॥

દીર્ઘદંષ્ટ્રા દીર્ઘમુખી દીર્ઘઘોણા ચ દીર્ઘિકા ।
દનુજાન્તકરી દુષ્ટા દુઃખદારિદ્ર્યભઞ્જિની ॥ ૧૭॥

દુરાચારા ચ દોષઘ્ની દમપત્ની દયાપરા ।
મનોભવા મનુમયી મનુવંશપ્રવર્દ્ધિની ॥ ૧૮॥

શ્યામા શ્યામતનુઃ શોભા સૌમ્યા શમ્ભુવિલાસિની ।
ઇતિ તે કથિતં દિવ્યં નામ્નામષ્ટોત્તરં શતમ્ ॥ ૧૯॥

ભૈરવ્યા દેવદેવેશ્યાસ્તવ પ્રીત્યૈ સુરેશ્વરિ ।
અપ્રકાશ્યમિદં ગોપ્યં પઠનીયં પ્રયત્નતઃ ॥ ૨૦॥

દેવીં ધ્યાત્વા સુરાં પીત્વા મકારપઞ્ચકૈઃ પ્રિયે ।
પૂજયેત્સતતં ભક્ત્યા પઠેત્સ્તોત્રમિદં શુભમ્ ॥ ૨૧॥

ષણ્માસાભ્યંતરે સોઽપિ ગણનાથસમો ભવેત્ ।
કિમત્ર બહુનોક્તેન ત્વદગ્રે પ્રાણવલ્લભે ॥ ૨૨॥

સર્વં જાનાસિ સર્વજ્ઞે પુનર્માં પરિપૃચ્છસિ ।
ન દેયં પરશિષ્યેભ્યો નિન્દકેભ્યો વિશેષતઃ ॥ ૨૩॥

॥ ઇતિ શ્રીભૈરવ્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shri Bhairavi aShTottarashatanAmastotram*

pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*